Not noticed by Burnell, Ms. No. 15872. Paper. 10×4 inches. Sheets—6. Lines—8 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

स्त्रीणां तुलापुरुषादिमहादानविधौ कुण्डमण्डपादिमन्त्राश्च वर्तन्ते वा न वा इति विचारे ।

स्त्रीणां तु यजमानत्वेन वापि योन्याकाराण्येव नवानां यथोक्ताकारत्वे च स्थण्डिलत्वे च सर्वत्र हस्तमात्रं क्षेत्रफलं सममेव साध्यमिति हेमाद्रिवचनात् कुण्डमण्डपविधानं सिद्धम् ॥

End:

संकल्पवाक्ये तु न विशेषः उपतुलाविषये तु स्त्रीणां पुंसां च न विशेषः ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ मकरसङ्क्रान्तितिलदानप्रकारः ॥

13623. MAKARASAṄKRĀNTITILADĀNA-PRAKĀRAḤ.

Burnell's Catalogue No. 3273. Paper. 10½×4½ inches.

Sheet—1. Lines—10 to a Page. Devanāgarī. No. of Granthas—8. Complete.

Beginning:

श्रीगणेशाय नमः ।

मकरसंक्रान्तौ तिलदानप्रकारः । आचम्य । प्राणानायम्य । देशकालौ संकीर्त्य । एवंगुणविशेषणविशिष्टायां शुभतिथौ मम मकरसंक्रान्तिजनितसमस्तपीडापरिहारार्थं ब्राह्मणाय तिलदानं करिष्ये ।

End:

इदं तिलदानं सदक्षिणाकं सताम्बूलं संक्रान्तिदेवताप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥ देवस्य त्वा श्रेयसे प्रतिगृ० अप उपस्पृश्य आचम्य ।

Remarks:—The Ms. is in good condition.

॥ नक्षत्रयोगदानम् ॥

13624. NAKṢATRAYOGADĀNAM.

Burnell's Catalogue No. 3263. Paper. 8½ × 4 inches. Sheets—4. Lines—8 or 9 to a Page. Devanāgarī. No. of Granthas—36. Complete.

Beginning:

युधिष्ठिर उवाच ।

श्रुतं मे भवतो वाक्यमन्नदानस्य यो विधिः ।
नक्षत्रयोगस्येदानीं दानकल्पं ब्रवीहि मे ॥

भीष्म उवाच ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।

देवक्याश्चैव संवादं महर्षेर्नारदस्य च ॥

End:

भीष्म उवाच ॥

इत्येष लक्षणोद्देशः प्रोक्तो नक्षत्रयोगतः ।

देवस्य नारदेनेह सा स्नुषाभ्योऽब्रवीदिदम् ॥

Colophon:

इति दानधर्मेषु नक्षत्रयोगदानम् ॥

Remarks:—The Ms. is in good condition.

॥ क्षत्रियहिरण्यदानम् ॥

13625. KṢATRIYAHIRAṆYADĀNAM.

Burnell's Catalogue No. 3299. Paper. 10⅛×4½ inches. Sheet—1. Lines—6 to a Page. Devanāgarī. No. of Granthas—6. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य देशकालौ संकीर्त्य । कौशिकगोत्राया अश्वि-
नीनक्षत्रे मेषराशौ जातायाः शरीरे + मृत्युञ्जयप्रीत्यर्थं
हिरण्यदानं करिष्ये ॥

End:

असौ अहमिदं निष्कमात्रं हिरण्यं सदक्षिणं पूर्वोक्तफल-
कामस्तुभ्यं संप्रददे न ममेति दद्यात् ॥

Colophon:

इति हिरण्यदानम् ॥

Remarks:—The Ms. is in good condition.

HIRAṆYADĀNAPRAYOGAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.	
13626	B. L. 3233	P.	De.	Complete.	Hiraṇyavṛṣabhadānaprayogaḥ.
13627	,, 3234	,,	,,	,,	
13628	,, 3235	,,	,,	,,	
13629	,, 3236	,,	,,	,,	
13630	,, 3368	,,	,,	,,	
13631	,, 3367	,,	,,	,,	Hiraṇyavṛṣabhadānavidhiḥ.

॥ सुवर्णधेनुविधानम् ॥

13632. SUVARṆADHENUVIDHĀNAM.

Burnell's Catalogue No. 3255. Paper. 10¾ × 4¼ inches. Sheets—2. Lines—7 or 8 to a Page. Devanāgarī. No. of Granthas—25. Complete.

Beginning:

सुवर्णधेनुविधानं हि महार्णवोक्तम् । वायुपुराणे ॥

चतुर्विधा च या वन्ध्या भवेद्वत्सवियोजनात् ।
वक्ष्ये तस्याः प्रतीकारं तत्स्वरूपं निबोधत ॥

हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढाम् ।
धेनुं पलेन वत्सं च पादेन गुरुरब्रवीत् ॥

End:

प्रयच्छन्तु दिवारात्रमविच्छेदं तथान्यथा ॥
एवं दत्वा तु तद्दानं प्रणिपत्य विसर्जयेत् ॥

Colophon:

इति वन्ध्यात्वहरसुवर्णधेनुदानम् ॥

Remarks:—The Ms. is in good condition.

॥ हिरण्यकामधेनुदानविधिः ॥

13633. HIRAṆAYAKĀMADHENUDĀNAVIDHIḤ.

Burnell's Catalogue No. 3320. Paper. 14⅓ × 7¼ inches. Sheets—9. Lines—20-26 to a Page. Devanāgarī. No. of Granthas—650. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ लिङ्गपुराणोक्तहिरण्यधेनुदानविधिः ॥ हिरण्यकामधेनुदानं चिकीर्षुः शुभे दिने शोभने मुहूर्ते तीर्थपुण्यदेशादौ मण्डपं कर्तुं यथायोगं मार्जनादिना स्मृत्युक्तमार्गेण भुवं संशोध्य समामादर्शोदरसंनिभां कुर्यात् ॥

End:

अनेन मया कृतेन लिङ्गपुराणोक्तषोडशमहादानान्तर्गतहिरण्यकामधेनुदानेन भगवान्सर्वात्मकः श्रीसाम्बसदाशिवः प्रीयताम् ॥

Colophon:

इति हिरण्यकामधेनुदानप्रयोगः संपूर्णः ।

Remarks:—The Ms. is in good condition.

HIRAṆYAKĀMADHENUDĀNAVIDHIḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13634	B. L. 3232	P.	De.	Complete.
13635	,, 3321	,,	,,	Incomplete.

॥ हिरण्यगजदानप्रयोगः ॥

13636. HIRAṆYAGAJADĀNAPRAYOGAḤ.

Burnell's Catalogue No. 3346. Paper. 12×6¼ inches. Sheets—13. Lines—15-18 to a Page. Devanāgarī. No. of Granthas—725. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ हिरण्यगजदानप्रयोगः । हिरण्यगजदानं चिकीर्षुः शुभे दिने शोभने मुहूर्ते तीर्थपुण्यदेशादौ मण्डपं कर्तुं यथायोगं मार्जनादिना स्मृत्युक्तमार्गेण भुवं संशोध्या-दर्शोदरसंनिभां कुर्यात् ॥

End:

अनेन मया कृतेन लिङ्गपुराणोक्ताहिरण्यगजदानेन भगवान्सर्वात्मकः श्रीसाम्बसदाशिवः प्रीयताम् । ततः स्वस्तिपुण्याहवाचनं कुर्यात् ॥

Colophon:

इति हिरण्यगजदानप्रयोगः समाप्तः ॥

Remarks:—The Ms. is in good condition.

HIRAṆYAGAJADĀNAPRAYOGAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13637	B. L. 3347	P.	De.	Complete.
13638	,, 3348	,,	,,	Incomplete.

॥ हिरण्याश्वदानम् ॥

13639. HIRAṆYĀŚVADĀNAM.

Burnell's Catalogue No. 3324. Paper. 14½ × 7¼ inches. Sheets—12. Lines—18-23 to a Page. Devanāgarī. No. of Granthas—900. Complete.

Beginning:

अथ लिङ्गपुराणोक्तहिरण्याश्वदानविधिः ॥

हिरण्याश्वदानं चिकीर्षुः शुभे दिने शोभने मुहूर्ते तीर्थपुण्यदेशादौ मण्डपं कर्तुं यथायोगं मार्जनादिना स्मृत्युक्तमार्गेण भुवं संशोध्य समामादर्शोदरसंनिभां कुर्यात् ॥

End:

अनेन मया कृतेन लिङ्गपुराणोक्तषोडशमहादानान्तर्गतहिरण्याश्वदानेन भगवान्सर्वात्मकः श्रीसाम्बसदाशिवः प्रीयताम् । ततः स्वस्तिपुण्याहवाचनं कुर्यात् ॥

Colophon:

इति लिङ्गपुराणोक्तषोडशमहादानान्तर्गतहिरण्याश्वदानप्रयोगः ॥

Remarks:—The Ms. is in good condition.

HIRAṆYĀŚVADĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13640	B. L. 3325	P.	De.	Complete
13641	„ 3384	„	„	„

॥ सुवर्णकदलीदानम् ॥

13642. SUVARṆAKADALĪDĀNAM.

Not noticed by Burnell Ms. No. 15878. Paper. 10 × 4½ inches.

Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—12. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य देशकालौ संकीर्त्य । कौशिकगोत्रायाः सौभाग्यवत्याः अश्विनिनक्षत्रे मेषराशौ जातायाः यमुनाम्बानामधेयायाः कर्मविपाकोक्तप्रकारेण सुवर्णकदलीदानं करिष्ये ॥

End:

अस्मै ब्राह्मणाय इमां गोमयालेपितरङ्गवल्लीरचित + गन्धपुष्पाद्यर्चितां सुवर्णकदलीं पूर्वोक्तफलकामस्तुभ्यं संप्रददे न ममेति दद्यात् ॥

Colophon:

इति सुवर्णकदलीदानप्रकारः ॥

Remarks—The Ms. is in good condition.

॥ सुवर्णपद्मदानविधिः ॥

13643. SUVARṆAPADMADĀNAVIDHIḤ.

Burnell's Catalogue No. 3272. Paper. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—13. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य देशकालौ संकीर्त्य । कौशिकगोत्रायाः सौभाग्यवत्या अश्विनीनक्षत्रे मेषराशौ जाताया यमुनाम्बानामधेयायाः + फलपरिमितसुवर्णनिर्मितपद्मदानं कर्मविपाकोक्तप्रकारेण करिष्ये ॥

End:

अस्मै अहमिदमाढकपरिमिततिलोपरि प्रतिष्ठितजला-
पूर्णताम्रपात्रस्थितं सुवर्णनिर्मितं पद्मं पूर्वोक्तफलकामस्तु-
भ्यमहं संप्रददे न ममेति दद्यात् ॥

Colophon:—

इति सुवर्णपद्मदानम् ॥

Remarks:—The Ms. is in good condition.

॥ राजतपद्मदानम् ॥

13644. RĀJATAPADMADĀNAM.

Burnell's Catalogue No. 3271. Paper. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—10. Complete.

Beginning:

आचम्य । देशकालौ संकीर्त्य कौशिकगोत्रायाः सौ-
भाग्यवत्या अश्विनीनक्षत्रे मेषराशौ जाताया यमुनाम्बा-
नामधेयायास्तस्याः क्षेमस्थैर्य + चन्द्रग्रहप्रीत्यर्थं कर्मवि-
पाकोक्तप्रकारेण रजतपद्मदानं करिष्ये ।

End:

अस्मै अहमिदं आढकपरिमिततिलोपरिप्रतिष्ठितजलपू-
र्णताम्रपात्रे स्थितं राजतं पद्मं पूर्वोक्तफलकामस्तुभ्यं संप्र-
ददे न ममेति दद्यात् ।

Colophon:

इति राजतपद्मदानम् ।

Remarks:—The Ms. is in good condition.

॥ सुवर्णमेदिनीदानविधिः ॥

13645. SUVARṆAMEDINĪDĀNAVIDHIḤ.

Burnell's Catalogue No. 3337. Paper. 12×6½ inches. Sheets—3. Lines—9 to a Page. Devanāgarī. No. of Granthas—53. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ लिङ्गपुराणोक्तसुवर्णमेदिनीदानविधिः । सनत्कुमार उवाच ॥

सुवर्णमेदिनीदानं प्रवक्ष्यामि समासतः ।
पूर्ववद्देशकालौ च कारयेन्मुनिभिः सह ॥
लक्षणेन यथापूर्वं कूटे वा मण्डपेऽपि वा ।
मेदिनीं कारयेद्दिव्यां सहस्रेणापि वा पुनः ॥

End:

मेधावी जायते मर्त्यो दानस्यास्य प्रभावतः ।
इत्थं भूत्वा महाराज कृत्वा राज्यमकण्टकम् ॥
प्रेत्य विष्णोः पदं याति शाश्वतं तन्निरामयम् ॥

Colophon:

इति लिङ्गपुराणोक्तसुवर्णमेदिनीदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ गृहदानविधिः ॥

13646. GṚHADĀNAVIDHIḤ.

G. K. D. Collection No. 84. Paper. 9¼×4¼ inches. Sheets—2. Lines—11 or 12 to a page. Devanāgarī. No. of Granthas—30. Complete.

Beginning :

अथ गृहदानप्रयोगः । यजमानः कृतनित्यक्रियः पुण्यकाले गृहमध्ये दक्षिणभागे चन्दनेन वस्त्रादिषु अष्टदलपद्मं विलिख्य तदुपरि प्रस्थपरिमिततिलान्निक्षिप्य + लक्ष्मीनारायणप्रतिमामग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः संपूजयेत् ॥

End:

तथैव संस्पृश्य स्थूणां द्वारदेहलीं संस्पृश्य प्रतिगृह्णीयादिति सांप्रदायिकाः ।

Colophon:

इति दानचन्द्रिकायां गृहदानविधिः ।

Remarks:—The Ms. is in good condition.

॥ गृहदानविधिः ॥

13647. GṚHADĀNAVIDHIḤ.

G. K. D. Collection No. 137. Paper: $8\frac{1}{2} \times 8\frac{1}{2}$ inches. Sheets —6, Lines—7 to a Page. Devanāgarī. No. of Granthas —75. Complete.

Beginning:

अथ गृहदानम् ॥ रचनाप्रकारः ॥

क्रमप्राप्तस्य भूदानस्य प्रागभिहितत्वाद्गृहदानमुच्यते । रचनाप्रकारः । शुभनक्षत्रे कर्तुश्चन्द्रबलोपेते । + तन्मध्ये नवधान्यान्येकीकृत्य ब्रह्मस्थानं परिकल्पयेत् ॥

End:

अनन्तरं सपत्नीकं ब्राह्मणं शय्यायामुपवेश्य ताम्बूलानि

दत्त्वा प्रणिपत्य तस्माद्गृहान्निर्गत्य स्वगृहं व्रजेत् । यस्ये-

त्यादि ।

Colophon:

इति हेमाद्रौ ब्राह्मणाय गृहदानविधिः ढोले अनन्ताचार्याणामिदं पुस्तकं स्वार्थं परार्थं च ॥

Remarks:—The Ms. is in good condition.

॥ गृहदानप्रयोगः ॥

13648. GṚHADĀNAPRAYOGAḤ.

Burnell's Catalogue No. 8275. Paper. 9⅞×4⅞ inches. Sheets—2. Lines—8 or 9 to a Page. Devanāgarī. No. of Granthas—23. Complete.

Beginning:

अथ गृहदानप्रयोगः ॥

दाता कृतवास्तुप्रतिष्ठं कदलीस्तम्भाद्यलंकृतं संभृतोप-

स्कारं गृहं वाद्यघोषैः सह भार्यायुतो ब्राह्मणैः सह प्रवि-

श्य । + प्रतिग्रहीतारं सभार्यं करे धृत्वा समङ्गलघोषैर्वक्ष्य-

माणमन्त्रैर्गृहं प्रवेशयेत् ॥

End:

इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।

तव विप्र प्रसादेन ममास्त्वभिनवं गृहम् ॥

गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम ।

प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दनः ॥

संपन्नं वाप्यसंपन्नं सर्वोपस्करसंयुतम् ।

सर्वं संपूर्णमेवास्तु त्वत्प्रसादाद्द्विजोत्तम ॥

इत्युक्त्वा नमस्कृत्य स्वगृहं व्रजेत् ॥

Colophon:

इति दानमयूखोक्तगृहदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ ब्रह्मवास्तुसहितभूदानम् ॥

13649. BRAHMAVĀSTUSAHITABHŪDĀNAM.

Not noticed by Burnell Ms. No. 16874 Paper. 4×10 inches. Sheet—1. Lines—14-23 to a Page. Devanāgarī. No. of Granthas—16. Complete.

Beginning:

ब्रह्मवास्तुसहितं भूदानमाह । व्यासः ।

पितुरुद्देशेन विप्रेभ्यो भूदानं परिकल्पयेत् ।

आत्मा वै साधितस्तेन एकविंशतिपूरुषैः ॥

पादक्रमप्रमाणां वै यो दद्याच्च वसुन्धराम् ।

तावदब्दसहस्राणि स्वर्गे वसति भूमिदः ॥

End:

इयं भूमिर्मया दत्ता सर्वसस्याभिवर्द्धनी ।

इमां भुक्त्वा सुखं लब्ध्वा मां च तारय सुव्रत ॥

प्रतिदानं मन्त्रावृत्तिः ॥ विप्राय वेदवि ० देवस्यत्वा

Remarks:—The Ms. is in good condition.

॥ वस्त्रदानम् ॥

13650. VASTRADĀNAM.

Burnell's Catalogue No. 3280. Paper. $10\frac{1}{4}\times4\frac{1}{4}$ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—20. Complete.

Beginning:

अथ वस्त्रदानम् । देवलः ॥

कान्तियुक्तस्तु सुभगः श्रीमान्भवत्यम्बरदानकृत् ।

नन्दिपुराणे ।

वस्त्रं यश्चार्थिने दद्याच्छुभं वापि यदृच्छया ।

स चावेदनवाञ्श्रीमान्बृहस्पतिपुरे वसेत् ॥

End:

मनुष्यमासाद्य भवन्त्यरोगाः शौचान्विताः सौख्यपरास्तथापि ।

जनाभिरामाश्च तथा सुवेषाः पूज्याश्च लोके विदुषां सदैव ॥

Colophon:

इति वस्त्रदानविधिः ।

Remarks:—The Ms. is in good condition.

॥ वस्त्रदानम् ॥

13651. VASTRADĀNAM.

Burnell's Catalogue No. 8281. Paper. $10\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheet—1. Lines—9 to a page. Devanāgarī. No. of Granthas—10. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य देशकालौ संकीर्त्य । कौशिकगोत्रायाः सौभाग्यवत्या अश्विनीनक्षत्रे मेषराशौ जाताया यमुनाम्बानामधेयायास्तस्याः + कर्मविपाकोक्तमार्गेण वस्त्रदानं करिष्ये ॥

End:

अस्मै ब्राह्मणायाहमिदं वस्त्रं सदक्षिणाकं सताम्बूलं

पूर्वोक्तफलकामस्तुभ्यं संप्रददे न ममेति दद्यात् ॥

Colophon:

इति वस्त्रदानम् ॥

Remarks: —The Ms. is in good condition.

॥ यज्ञोपवीतदानम् ॥

13652. YAJÑOPAVĪTADĀNAM.

Burnell's Catalogue No. 3292. Paper. 10¼×4 inches. Sheets—2. Lines—6 or 7 to a Page. Devanāgarī. No. of Granthas—25. Complete.

Beginning:

अथ गर्भिण्या गर्भस्रावहरं यज्ञोपवीतदानम् । वायु-
पुराणे ।

यज्ञोपवीतं कुर्वीत काञ्चनं तु स्वशक्तितः ।
अत्यन्तवर्णयुक्तं च राजतं चोत्तरीयकम् ॥

End:

ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्त्वा यज्ञोपवीतप्रतिग्रहीतुरनुव्रजनप्रणिपातक्षमापणानि कृत्वा यथाशक्ति ब्राह्मणान्भोजयित्वेश्वरार्पणं कुर्यात् ॥

Colophon:

इति स्मृतिकौस्तुभे विज्ञानमालायां कर्मविपाकोक्तयज्ञोपवीतदानविधिः ।

Remarks:—The Ms. is in good condition from Smṛti Kaustubha.

॥ यज्ञोपवीतदानविधिः ॥

13653. YAJÑOPAVĪTADĀNAVIDHIḤ.

Burnell's Catalogue No. 3304. Paper. 9½×4½ inches. Sheet

—1. Lines—7 to a Page. Devanāgarī. No. of Granthas—5. Complete.

Beginning:

श्रीगणेशाय नमः ।

हेमाद्रि । इति यज्ञोपवीतदानविधिः । अथ शिरोरोगघ्नयज्ञोपवीतदानम् । ना...रेण ।

उपवीतं हिरण्येन निर्मितं तु पलार्धतः ।

तदर्धेन तदर्धेन यथाविभवतोऽपि वा ॥

End:

धाता विधाता जगतां परमात्मा चतुर्मुखः ।

विनाशयतु मे क्षिप्रं रोगवेगं शिरोगतम् ॥ दानमन्त्रः ।

Colophon:

इति शिरोरोगघ्नयज्ञोपवीतदानम् ।

Remarks:—The Ms. is in good condition.

॥ अलंकारदानम्—रुद्रयामलम् ॥

13654. ALAṂKĀRADĀNAM—RUDRAYĀMALAM.

Burnell's Catalogue No. 8302. Paper. 13¼ × 5 inches. Sheet —1. Lines—9 to a Page. Devanāgarī. No. of Granthas—13. Complete.

Beginning:

द्विजातिभ्यस्ततो दद्यादलंकारान्समुज्ज्वलान् ।

...लं कृत्वा स्वर्गलोके क्रीडन्त्यप्सरसां गणैः ।

अलंकारप्रदानेन सुरूपः सुभगो भवेत् ॥

तथालंकारदानेन दीर्घमायुश्च विन्दति ॥

End:

प्राणिजैः प्राणिजेता स्यात्कटिसूत्रैर्विरही भवेत् ।

आनुजैरतिवेगी स्या...रणश्चरणोद्भवैः ।

नालंकृतेभ्यो नरपुंगवेभ्यः परं त्रिलोके स्पृहणीयमस्ति ।

न कल्प्यते....विना हि वृत्तिरतः प्रदेयानि विभूषणाणि ॥

Colophon:

इत्यलंकारदानविधिः ।

Remarks:—The Ms. is in good condition. After the Colophon is given two lines:—

अथातः संप्रवक्ष्यामि + राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् ।

॥ शय्यादानम् ॥

13655. ŚAYYĀDĀNAM.

Burnell's Catalogue No. 3282. Paper. 10¼×4¼ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—22. Complete.

Beginning:

भविष्योत्तरे ॥

शय्यादानं प्रवक्ष्यामि तव पाण्डुकुलोद्भव ।

यां दत्त्वा शिवभागी स्यादिह लोके परत्र च ॥

शय्यादानं प्रशंसन्ति सर्वदैव द्विजोत्तमाः ।

अनित्यं जीवितं यस्मात्पश्चात्कोऽन्यः प्रदास्यति ॥

End:

शय्याप्रदानममलं तव पाण्डुपुत्र

संकीर्तितं सकलसौख्यनिधानभूतम् ।

यो वै ददाति विधिवत्स्वयमेव नाके

कल्पं विकल्परहितः स विभाति मर्त्यः ॥

Colophon:

इति शय्यादानम् ।

Remarks:—The Ms. is in good condition.

ŚAYYĀDĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13656	B. L. 3283	P.	De.	Complete.

॥ दासीदानम् ॥

13657. DĀSIDĀNAM.

Burnell's Catalogue No. 3298. Paper. $9\frac{7}{8}\times4\frac{1}{4}$ inches. Sheets—2. Lines—9 or 10 to a Page. Devanāgarī. No. of Granthas—20. Complete.

Beginning:

अथ दासीदानम् ॥ वह्निपुराणे ।

गृहदानं श्रुतं राजन्दासीदानं ततः शृणु ।
तव भक्त्या प्रवक्ष्यामि महासौख्यप्रदायकम् ॥

End:

भविष्यत्पुराणे ।

विनीतामथ दासीं यः पुत्रकं वा निवेदयेत् ।
नरमेधस्य यज्ञस्य फलं विन्दति मानवः ॥

Colophon:

इति सूर्याय दासीदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ शिबिकादानविधिः ॥

13658. ŚIBIKĀDĀNAVIDHIḤ.

Burnell's Catalogue No. 368. Paper. $9\frac{7}{8} \times 4\frac{1}{2}$ inches. Sheet—1. Lines—9 to a Page. Devanāgarī. No. of Granthas—16. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ दानप्रसङ्गेन शिबिकादानमुच्यते । वह्निपुराणे ॥
वसिष्ठ उवाच ।
शृणु चान्यन्महीपाल महादानमनुत्तमम् ।
माघफाल्गुनयोर्वापि वैशाखे सुसरित्सु च ॥

* * *

शिबिकां चक्रवंशोत्थ ऋजुदासमयीमथ ।
आर्ताय संनिधिं विष्णोः शुभच्छत्रसमान्विताम् ॥

End:

भुक्त्वा तु विपुलान्भोगानिहामुत्र सुखप्रदान् ।
सपत्नीकः सपितृको विष्णुसायुज्यमश्नुते ॥

Colophon:

इति शिबिकादानविधिः ।

Remarks:—The Ms. is in good condition.

॥ आपाकनवपात्रदानम् ॥

13659. ĀPĀKANAVAPĀTRADĀNAM.

G. K. D. Collection No. 131. Paper. 10×4 inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—20. Complete.

Beginning:

आचम्य । देशकालौ संकीर्त्य । एवङ्गुणविशेषणवि-शिष्टायां मम इह जन्मनि + इष्टदेवताप्रीत्यर्थं मकरसंक्रान्तिपुण्यकाले कुलालदीप्तिस्थापकनवपात्रदानं करिष्ये ।

End:

नानागोत्रेभ्यः सुवासिनीभ्यश्च उत्सृजामि । साक्षात्पुष्पाक्षुदकधारां जले निक्षिपेत् ।

Colophon:

श्री आपाकनवपात्रदानं समाप्तम् ।

Remarks:—The Ms. is in good condition.

ĀPĀKANAVAPĀTRADĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13660	G. K. D. 130	P.	De.	Complete.
13661	T. S. 589	,,	,,	,,

॥ उदकुम्भदानविधिः ॥

13662, UDAKUMBHADĀNAVIDHIḤ.

Burnell's Catalogue No. 8269. Paper. 10 × 4½ inches. Sheet —1. Lines—7 to a Page. Devanāgarī. No. of Granthas—6. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य देशकालौ संकीर्त्य कौशिकगोत्रायाः अश्विनी-नक्षत्रे मेषराशौ जातायाः सौभाग्यवत्या यमुनाम्बानामधे-

यायास्तस्याः + श्रीमृत्युंजयप्रीत्यर्थं कर्मविपाकोक्तप्रका-
रेणोदकुम्भदानं करिष्ये ॥

End:

अस्मै अहमिममुदकुम्भं सदक्षिणं पूर्वोक्तफलकामस्तुभ्यं
संप्रददे न ममेति दद्यात् ॥

Colophon:

इत्युदकुम्भदानम् ॥

Remarks:—The Ms. is in a fairly good condition.

॥ कांस्यपात्रदानम् ॥

13663. KĀṂSYAPĀTRADĀNAM.

Burnell's **Catalogue No. 3300. Paper. 9½×4 inches.** Sheets—2. Lines—7 to a Page. Devanāgarī. No. of Granthas—19. Complete.

Beginning:

एवंगुणेत्यादि मम जनन्या दशमासेषु उदरसंस्थितस्त-
न्यपानमलमूत्रसंलेपनादिमभिमिचानेकदुःखजनितऋणवि-
मोचनद्वारा + मातृऋणविमोचनकांस्यपात्रदानं करिष्ये ।

End:

प्रतिग्रहीतृवचनम् ॥

........जननीसंभवाहणात् ।

मुक्तस्त्वं पात्रादानेन महेश्वरवचो यथा ॥

Colophon:

इति मातृऋणविमोचनकांस्यदानविधिः ।

Remarks:—The Ms. is in good condition,

KĀMSYAPĀTRADĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13664	B. L. 3288	P.	De.	Complete.

॥ अन्नदानम् ॥

13665. ANNADĀNAM.

Burnell's Catalogue No. 622. Paper. 12 × 5 inches. Sheets—2. Lines—9 to a Page Devanāgarī. No. of Granthas—27. Complete.

Beginning:

रुद्रयामले । अथान्नदानम् ।

अथ वक्ष्ये विशेषेण दानानामुत्तमोत्तमम् ।
सर्वेषामेव दानानामन्नदानं ततः परम् ॥
राहौ कुम्भगते शुद्धे द्वादश्यां च विशेषतः ।
रहस्यकृतदोषश्च क्षिप्रमेव विनश्यति ॥

End:

सर्वलोकवशीकारमन्नं च परमौषधम् ।
आपत्सु च सदा हृद्यं कामदं मणिमुत्तमम् ॥
दानं हि दुर्घटं चैव दानं वै सुरपादपः ।

Colophon.

इति रुद्रयामलेऽन्नदानम् ॥

Remarks:—The Ms. is in good condition.

ANNADĀNAM.

Descriptive No.	Collection No.	Substance,	Script,	Remarks.
13666	B. L. 625	P.	De.	Complete.

ANNADĀNAM (Contd.)

Descriptive No.	Collection No.		Substance.	Script	Remarks.
13667	B. L.	64	P.	De.	Complete.
13668	„	626	„	„	„
18669	„	627	„	„	„

॥ मुद्गान्नदानादि ॥

13670. MUDGĀNNADĀNĀDI.

G. K. D. Collection No. 139. Paper. 10¼ × 8½ inches. Sheet —1. Lines—20 to a Page. Devanāgarī. No. of Granthas —85. Complete.

Beginning:

आचम्य । शुभे शोभनमुहूर्ते परमेश्वरप्रीत्यर्थं लक्ष्मीनारायणप्रीत्यर्थं ब्राह्मणाय मुद्गान्नदानं करिष्ये ।

End:

इदं मुद्गान्नपात्रव्यञ्जनादिसहितदानं सताम्बूलं सदक्षिणाकं लक्ष्मीनारायणप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । प्रतिगृह्यताम् । प्रतिगृह्णामि । आचम्य ॥

Remarks:—The Ms. is in good condition.

MUDGĀNNADĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
18671	G. K. D. 134	P.	De.	Complete.

॥ पिष्टान्नदानम् ॥

13672. PIṢṬĀNNADĀNAM.

Burnell's Catalogue No. 3317. Paper. 10⅛ × 4⅞ inches. Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—9. Complete.

Beginning:

आचम्य । देशकालौ संकीर्त्य ।

End:

संप्रददे न ममेति दद्यात् ॥

Colophon:

इति पिष्टान्नदानम् ॥

Remarks:—The Ms. is in good condition.

॥ अन्नदानसङ्कल्पः ॥

13673. ANNADĀNASAṄKALPAḤ.

Burnell's Catalogue No. 3274. Paper. 7¼ × 4½ inches. Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—8. Complete.

Beginning:

श्रीराम । दानकमलाकर ॥

सद्यस्तुष्टिकरं लोके किं दानेन परेण ते ।

अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयम् ॥

तस्मादन्नसमं दानं न भूतं न भविष्यति ॥

ब्रह्महत्याकृतं पापमन्नदानात्प्रणश्यति । * *

प्रासादोपभोगात्यन्तिकसुखावाप्तिपापक्षयब्रह्मलोकग-

मनपुत्रपौत्रावृतत्वबहुविधगन्धमाल्याभरणमुदितत्ववीतशो·
कचित्तबहुस्त्रीसहितसततहर्षप्राप्तिकामः अन्नदानं करिष्ये ॥

Remarks:—The Ms. is in good condition.

॥ अपूपदानविधिः ॥

13674. APŪPADĀNAVIDHIḤ.

S. K. Collection No. 140. Paper. 10½×3½ inches. Sheet—1. Lines—22 to a Page. Devanāgarī. No. of Granthas—10. Complete.

Beginning:

अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च ।
त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने ॥
साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम ।
अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः ॥

End:

मलानां च विशुद्ध्यर्थं पापप्रशमनाय च ।
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर ॥
मन्त्रेणानेन यो दद्यात्त्रयस्त्रिंशदपूपकान् ।
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ॥

Colophon:

मलमासप्रयुक्तापूपदानविधिः

Remarks:—The Ms. is in good condition.

॥ आज्यमधुघृतदानमन्त्रः ॥

13675. ĀJYAMADHUGHṚTADĀNAMANTRAḤ.

G. K. D. Collection No. 187. Paper. 11×7½ inches.

Sheets—2. Lines—24 to a Page. Devanāgarī. No. of Granthas—10. Complete.

Beginning:

आचम्य । पूर्वोच्चरित एवंगुणविशेषणविशिष्टायां + उमामहेश्वरप्रीत्यर्थं ब्राह्मणाय मधुघृतदानं करिष्ये ॥

End:

इदं मधुघृतदानं सताम्बूलं सदक्षिणाकं उमामहेश्वरप्रीतिं कामयमानस्तुभ्यमहं संप्रददे । प्रतिगृह्यताम् । प्रतिगृह्णामि ॥

Remarks:—The Ms. is in a fairly good condition.

॥ नवनीतलिङ्गदानम् ॥

13676. NAVANĪTALINGADĀNAM.

C, K. D. Collection No. 129. Paper. 11×3½ inches. Sheet—1. Lines—10 to a Page. Devanāgarī. No. of Granthas—4. Complete.

Beginning:

आचम्य । परमेश्वरप्रीत्यर्थं मकरसंक्रान्ति उत्तरायणपर्वकाले उमामहेश्वरप्रीत्यर्थं गुडपार्वतिसहितनवनीतलिङ्गदानं करिष्ये ।

End:

इदं गुडपार्वतीसहितनवनीतलिङ्गदानं सताम्बूलं सदक्षिणाकं उमामहेश्वरप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

Remarks:—The Ms. is in good condition.

॥ ताम्बूलदानम् ॥

13677. TĀMBŪLADĀNAM.

Burnell's Catalogue No. 3248. Paper. 9½×4½ **inches.** Sheets—**5.** Lines—9 to a Page. Devanāgarī. No. of **Granthas**—64. Complete.

Beginning:

श्रीगणेशाय नमः ॥

हेमाद्रिताम्बूलदानम् । स्कान्दे नागरखण्डे । विश्वामित्रः ।

एषा पुण्यतमा मेध्या नागवल्ली नराधिप ।

अयथावत्कृता वक्त्रे बहून्दोषान्प्रयच्छति ॥

तस्माद्यत्नेन संभक्त्या दत्त्वा चैव स्वशक्तितः ॥

End:

विष्णुधर्मोत्तरे ॥

ताम्बूलस्य प्रदानेन सौभाग्यमपि विन्दति ।

दत्त्वा जातिफलं विप्राः स फलं विन्दते श्रियम् ॥

मुखवासप्रदानेन मुखसौगन्ध्यमाप्नुयात् ।

Colophon:

इति ताम्बूलदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ गोदानम् ॥

13678. GODĀNAM.

Not noticed by Burnell. Ms. No. 15875. Paper. 10×4½ **inches.** Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—10. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य । देशकालौ संकीर्त्य । कौशिकगोत्रायाः सौभाग्यवत्या अश्विनीनक्षत्रे मेषराशौ जाताया यमुनाम्बानामधेयायास्तस्या + कर्मविपाकोक्तं गोदानं ब्राह्मणपूजां च करिष्ये ॥

End:

असौ अहमिमां स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां कांस्यदेहिनीं वस्त्रावृतां गां पूर्वोक्तफलकामस्तुभ्यं संप्रददे न ममेति दद्यात् ॥

Remarks:—The Ms. is in a fairly good condition.

GODĀNAPRAYOGAḤ.

Descriptive No.		Collection No.	Substance.	Script.	Remarks.	
13679	B. L.	3492	P.	De.	Complete.	
13680	,,	3375	,,	,,	,,	Gosahasradāna.
13681	,,	3378	,,	,,	,,	,,
13682	,,	3380	,,	,,	,,	,,
13683	,,	3376	,,	,,	,,	,,
13684	,,	3377	,,	,,	,,	,,
13685	,,	3810 a	,,	,,	,,	Ubhayatomukhīgodānavidhi.
13686	,,	3212	,,	,,	,,	,,
13687	,,	3213	,,	,,	,,	,,
13688	,,	3240	,,	,,	,,	,,
13689	,,	3241	,,	,,	,,	,,
13690	,,	3242	,,	,,	,,	,,

GODĀNAPRAYOGAḤ (Contd.)

Descriptive No.	Collection No.		Substance.	Script.	Remarks.	
13691	B. L.	3349	P.	De.	Complete.	Ubhayatomukhīgodanavidhi.
13692	,,	3350	,,	,,	,,	,,
13693	,,	3351	,,	,,	,,	,,
13694	,,	3352	,,	,,	,,	,,
13695	,,	3353	,,	,,	,,	,,
13696	,,	3355	,,	,,	,,	,,
13697	,,	3356	,,	,,	,,	,,
13698	,,	3357	,,	,,	,,	,,
13699	,,	3358	,,	,,	,,	,,
13700	,,	3359	,,	,,	,,	,,
13701	,,	3360	,,	,,	,,	,,
13702	,,	336	,,	,,	,,	,,
13703	Not noticed by Burnell. Ms	15876	,,	,,	,,	,,
13704	,,	15877	,,	,,	,,	,,
13705	S. K.	248	,,	,,	,,	,,
13706	B. L.	3276	,,	,,	,,	Kapilādāna.
13707	,,	3277	,,	,,	,,	,,
13708	,,	3301	,,	,,	,,	,,
13709	,,	3490	,,	,,	,,	Alaṅkāradhenudāna.
13710	,,	3257	,,	,,	,,	Citrakapilāgodāna
13711	,,	3258	,,	,,	,,	,,
13712	,,	3307 b	,,	,,	,,	Daśavarṇadhenudāna.
13713	,,	3260	,,	,,	,,	Karpūrakastūrīdhenuvidhi.
13714	,,	3207	,,	,,	,,	,,
13715	G. K. D.	36	,,	,,	,,	Utkrāntigodāna.

DETAILED REMARKS

on the MSS. IN THE ABOVE TABLE.

13684 Colophon:—

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते दान-
कमलाकरे गोसहस्रदानम् ।

13685 Colophon:—

रामकृष्णभट्टसुतकमलाकरभट्टकृते दानकमलाकरे उभयतोमुखीदानम् ।

13697

इति मत्स्यपुराणे उभयतोमुखीप्रदानिको नामाध्यायः ।

13698

इति हेमाद्रावुभयतोमुखीदानविधिः ।

13705 Colophon:—

इत्युभयतोमुखीगोदानविधिः । वृषसंवत्सरश्रावण लाण्डगे नानासूनु-
रामस्वामिना लिखितम् ।

॥ ऋषभदानम् ॥

13716. ṚṢABHADĀNAM.

Not noticed by Burnell. Ms. No. 15878. Paper. 4 × 10½ inches. Sheet—1. Lines—15 to a Page. Devanāgarī. No. of Granthas—6. Complete.

Beginning:

रक्ताक्षं रक्तवपुषं रक्तपुष्पैः सुपूजितम् ।
रक्तगन्धानुलिप्ताङ्गं क्षुद्रघण्टादिभूषितम् ॥

रक्तपट्टसमायुक्तं गूढाढकसमन्वितम् ।
कौजपीडानिवृत्त्यर्थं दद्यादनडुहं बुधः ॥

End:

मम वाञ्छितसिद्ध्यर्थं त्वां दास्याम्यग्रजन्मने ।

दानेनानेन सुप्रीतो वाञ्छितार्थप्रदो भव ॥
विप्राय वेदविदुषे............ ॥

Remarks—The Ms. is in a fairly good condition.

॥ तुवरीभारसंयुक्तानडुद्दानम् ॥

13717. TUVARĪBHĀRASAṂYUKTĀ-NAḌUDDĀNAM.

Not noticed by Burnell. Ms. No. 15879. Paper. $4\frac{1}{4} \times 8\frac{1}{4}$ inches. Sheet—1. Lines—18 to a Page. Devanāgarī. No. of Granthas—8. Complete.

Beginning:

तुवरीभारसंयुक्तमनड्वाहं प्राङ्मुखं निधाय रक्तवस्त्रादिभिरलंकृत्य । एवंगुणेत्यादि + मम सर्वाभीष्टसिद्ध्यर्थं तुवरीभारसंयुक्तमनडुद्दानमहं करिष्ये ॥

End:

इदमनडुद्दानं सदक्षिणाकं सताम्बूलं ॥ शान्ता पृथिवी । पादौ प्रक्षाल्य ।

Remarks:—The Ms. is in good condition.

॥ अनडुद्दानसङ्कल्पः ॥

13718. ANAḌUDDĀNASAṄKALPAḤ.

Burnell's Catalogue No. 3318. Paper. $9\frac{5}{6} \times 4\frac{1}{2}$ inches. Sheet—1. Lines—6 to a Page. Devanāgarī. No. of Granthas—5. Complete.

Beginning:

श्रीगणेशाय नमः ॥

एवंगुणेत्यादि मम इह जन्मनि जन्मान्तरेषु वा संभावितसकलपापनिवृत्त्यर्थं जन्मनक्षत्रजन्मराश्यपेक्षया नामनक्षत्रनामराश्यपेक्षया च अरिष्टस्थानास्थित अंगारकसूचितसूच्यमानशत्रुभय अर्थहानिमनःखेदज्वरप्राणाग्निदाहानर्थसकलोपद्रवसंक्षयार्थं आयुरारोग्यसौभाग्यसमृद्ध्यर्थं अङ्गारकप्रीत्यर्थं यामलोक्तप्रकारेणानडुद्दानं करिष्ये । तत्रानड्वाहं ब्राह्मणं च पूजयेत् ॥

Remarks:—The Ms. is in good condition.

॥ महिषीदानविधिः ॥

13719. MAHIṢĪDĀNAVIDHIḤ.

Burnell's Catalogue No. 3252. Paper. $3\frac{1}{2} \times 10\frac{3}{4}$ inches. Sheet—1. Lines—22 to a Page. Devanāgarī. No. of Granthas—15. Complete.

Beginning:

महिषीदानविधिः ॥ आचम्य । देशकालौ संकीर्त्य । कौशिकगोत्राया अश्विनीनक्षत्रे मेषराशौ जातायाः सौभाग्यवत्या यमुनाम्बानामधेयायास्तस्या इह जन्मनि जन्मान्तरेषु + मृत्युंजयप्रीत्यर्थं महिषीदानं करिष्ये ।

End:

अस्मै ब्राह्मणाय इमां सवत्सां सदक्षिणां महिषीं सौभाग्यवत्या यमुनाम्बानामधेयायास्तस्याः सकलरोगपरिहारद्वारा आयुरभिवृद्ध्यर्थं तुभ्यमहं संप्रददे न ममेति दद्यात् ॥ ततो यजमानो हस्तौ पादौ प्रक्षाल्याचमनं कुर्यात् ॥

Remarks: The Ms. is in good condition.

MAHIṢĪDĀNAPRAYOGAḤ

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
13720	B. L.	3253	P.	De.	Complete.
13721	,,	3254	,,	,,	,,
13722	,,	3312	,,	,,	,,
13723	,,	3313	,,	,,	,,
13724	,,	3314	,,	,,	,,
13725	P. A.	161	,,	,,	,, Māhātmya only.
13726	B. L.	3311	,,	,,	,, Mahiṣīdānamantra.

॥ छागादिपञ्चकदानम् ॥

13727. CHĀGĀDIPAÑCAKADĀNAM.

Burnell's Catalogue No. 3265 Paper. $10\frac{1}{8} \times 4\frac{1}{4}$ inches. Sheets—4. Lines—8 or 9 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

छागादिपञ्चकम् । अमावास्यातिरिक्ततिथिव्यतीपात-वैधृतिविष्वारिजन्मत्रिजन्मनक्षत्रेषु देवालयादिषु पुण्यदेशेषु गोमयानुलेपितरङ्गवल्ल्यादिरचितभूभागोपरि सर्वावयव-संयुक्तं छागं तोयेन संस्नाप्य दक्षिणाभिमुखं निधाय नीलवस्त्रेण संवेष्ट्य स्वर्णशृङ्गरौप्यनेत्राय सपादकांस्यम-णिग्रीवैरलंकृत्य

वामाग्रपादे गोधूमान्दक्षिणाग्रे तु माषकम् ।
पश्चस्य वामदेशे तु निक्षिपेच्चणकं बुधः ॥

+ यामलोक्तप्रकारेण महाभयमृत्युहरच्छागदानं करिष्ये ॥

End:

लवणदानम् ॥

रसानामग्रजं श्रेष्ठं बलपुष्टिविवर्धनम् ।
तस्मादस्य प्रदानेन अतः शान्तिं प्रयच्छ मे ॥
ततो दशदानानि कुर्यात् ॥

Colophon:

छागादिपञ्चकदानं समाप्तम् ।

Remarks:—The Ms. is in a fairly good condition.

CHĀGĀDIPAÑCAKADĀNAVIDHIḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
13728	B. L.	3267	P.	De.	Complete.
13729	,,	3266	,,	,,	,,
13730	Not noticed by Burnell Ms.	15880	,,	,,	,,
13731	,,	15881	,,	,,	,,
13732	,,	15882	,,	,,	,,
13733	T. S.	534	,,	,,	,,
13734	G K. D.	132	,,	,,	,,
13735	Not noticed by Burnell Ms.	15383	,,	,,	,, Chāgadāna only.

॥ अश्वदानविधिः ॥

13728. AŚVADĀNAVIDHIḤ.

Burnell's Catalogue No. 3246. Paper. 10×4⅜ inches. Sheets—5. Lines—10 to a Page. Devanāgarī. No. of Granthas—105. Complete.

Beginning:

अथाश्वदानविधिः ॥

तत्राश्वोत्पत्तिः शालिहोत्रे ।

अयोनिजो योनिजश्च दैविकः संभवो द्विधा ।

निवृत्ते सकले लोके वनेनान्तर्हिते तथा ॥

End:

अनेन विधिना कुर्यादश्वदानं महामुने ।

यावन्ति हयरोमाणि तस्य स्तुतिश्च यावती ॥

तावद्युगसहस्राणि सूर्यलोके महीयते ।

इत्यपरोऽश्वदानविधिः ॥

अथ शिवधर्मोत्तरे ॥

शिवायाश्वमलंकृत्य यः पर्वणि निवेदयेत् ।

सोऽश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेत् ॥

Colophon:

इति शिवायाश्वदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ श्वेताश्वदानम् ॥

13737. ŚVETĀŚVADĀNAM.

Burnell's Catalogue No. 3816. Paper. 7¼×4¼ inches. Sheet—1. Lines—14 to a Page. Devanāgarī. No. of Granthas—18. Complete.

Beginning:

अथाश्वदानम् । अथ पूजामन्त्रः ।

मार्ताण्डाय सुवेगाय काश्यपाय त्रिमूर्तये ।

जगदीशाय सूर्याय अर्काय च नमोऽस्तु ते ॥

इदमिह दानवाक्यम् ॥ अद्यामुकगोत्रायेत्यादि ॥ इमम-

इवं सुवर्णतिलकालंकृतं + स्वर्गकामस्तुभ्यमहं संप्रददे न
मम ॥

End:

वाजिप्रदेन पुत्रेण उद्धृता नरकार्णवात् ।
रूपदानफलं ह्येतद्यल्लोका अक्षया नृणाम् ॥

Colophon:

इति श्वेताश्वदानविधिः ।

Remarks:—The Ms. is in good condition.

॥ गजदानविधिः ॥

13738. GAJADĀNAVIDHIḤ.

Burnell's Catalogue No. 8270. Paper. 10 × 4½ inches. Sheets—7. Lines—10 to a Page. Devanāgarī. No, of Granthas—148. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
अथ गजदानविधिः ॥ पालकाप्ये गजोत्पत्तिः ।
अण्डे किल समुत्पन्ना वारणाः पौर्वकालिकाः ।
तत्त्वण्डं तैजसं प्रोक्तमतः क्रीडन्ति पांसुभिः ॥
मार्ताण्डकाय सकलैस्तदण्डमभवत्किल ।
तस्मादैरावतः श्रीमानुत्पन्नः प्रथमो गजः ॥

End:

ऐरावतश्चतुर्दन्ती गजानां नायकस्तु यः ।
दिग्दन्तिनां पूर्वतमो व्रणं क्षपयतु प्रभुः ॥
अनन्तरमनुव्रज्य तमाचार्यं मुदा युतः ।
ब्राह्मणान्भोजयित्वा च स्वयं भुञ्जीत वाग्यतः ॥

एवं कृते व्रणैर्बाधा तत्क्षणादेव नश्यति ।
तेनैवं प्राणिभिः पूर्वं कार्यमारोग्यहेतवे ॥

Colophon:

इति व्रणहरगजदानविधिः ।

Remarks:—The Ms. is in a fairly good condition.

॥ कल्पवृक्षदानविधिः ॥

13739. KALPAVṚKṢADĀNAVIDHIḤ.

Burnell's Catalogue No. 3371. Paper. 12×6¼ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No of Granthas—18. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ लिङ्गपुराणोक्तकल्पवृक्षदानविधिः ।
सनत्कुमार उवाच ।
अथान्यत्संप्रवक्ष्यामि कल्पपादपमुत्तमम् ।
शतनिष्केण कर्तव्यः सर्वशाखासमन्वितः ॥
सर्वशाखाः सर्वदिगन्तशाखाः ॥

End:

कालोत्तरे ॥

पलानां तु सहस्रेण कारयेत्कल्पपादपम् ।
समूलदण्डपत्रं च फलपुष्पसमन्वितम् ॥
पञ्चस्कन्धं तु संकल्प्य पञ्चानां दापयेत्सुधीः ।
सद्योजातेति मन्त्रेण देयं ग्राह्यं शिवाग्रतः ।
दिव्यैर्विमानैर्देहान्ते शिवलोके महीयते ॥
पितरस्तस्य मोदन्ते सत्यलोके परं सुखम् ॥

Colophon:

इति कल्पवृक्षदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ कल्पवृक्षदानप्रयोगः ॥

13740. KALPAVṚKṢADĀNAPRAYOGAḤ.

Burnell's Catalogue No. 3872. Paper. 13¾ × 6½ inches. Sheets—14. Lines—16-21 to a Page, Devanāgarī. No. of Granthas—875. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ कल्पवृक्षदानप्रयोगः ॥ कल्पवृक्षदानं चिकीर्षुः शुभे दिने शोभने मुहूर्ते तीर्थपुण्यदेशादौ मण्डपं कर्तुं यथायोगं मार्जनादिना स्मृत्युक्तमार्गेण भुवं संशोध्य समां आदर्शोदरसंनिभां कुर्यात् ॥

End:

अनेन मया कृतेन लिङ्गपुराणोक्तकल्पपादपदानेन भगवान्सर्वात्मकः श्रीसाम्बशिवः प्रीयताम् । ततः स्वस्ति-पुण्याहवाचनं कुर्यात् ॥

Colophon:

इति लिङ्गपुराणोक्तषोडशमहादानान्तर्गतकल्पपादपदानप्रयोगः संपूर्णः ॥

Remarks:—The Ms. is in a fairly good condition. This is according to the system of Liṅgapurāṇa.

KALPAVṚKṢADĀNAPRAYOGAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13741	B. L. 3382	P.	Dẹ.	Complete.

KALPAVṚKṢADĀNAPRAYOGAḤ (Contd.)

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13742	B. L. 8383	P.	De.	Complete.

॥ पिचुमन्दकन्यादानम् ॥

13743. PICUMANDAKANYĀDĀNAM.

Burnell's Catalogue No. 3256. Paper. 10½×5⅛ inches. Sheets—2. Lines—10 to a Page. Devanāgarī. No. of Granthas—28. Complete.

Beginning:

अथ कन्यादानम् । यजमानः देशकालौ स्मृत्वा । शुभतिथौ अहं मम समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकावाप्तये अनेनाश्वत्थेन वरेण पिचुमन्दरूपिण्यां कन्यायां उत्पादयिष्यमाणसंतत्या द्वादशावरान् द्वादशापरान्पुरुषांश्च पवित्रीकर्तुमात्मनश्च सत्सन्तानाभिवृद्ध्यर्थं दर्शपूर्णमासादिसर्वयज्ञोपयोगित्वसिद्ध्यर्थं अश्वत्थाय त्रिमूर्तिस्वरूपाय पिचुमन्दरूपकन्यादानमहं करिष्ये ॥

End:

अश्वत्थाय मन्त्रादिनाभ्यर्च्य । फलताम्बूलदक्षिणां गृहीत्वा कृतस्याश्वत्थोद्वाहस्य प्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां सौवर्णीं दक्षिणां तुभ्यमहं संप्रददे । ॐ स्वस्ति ।

Remarks:—The Ms. is in good condition.

॥ तिलपर्वतदानप्रयोगः ॥

13744. TILAPARVATADĀNAPRAYOGAḤ.

Burnell's Catalogue No. 3255. Paper. 10½×5¼ inches.

Sheets—3. Lines—12 to a Page. Devanāgarī. No. of Granthas—75. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ हेमाद्रिदानकमलाकरस्थ ब्रह्मपुराणोक्ततिलपर्वत-दानप्रयोगो लिख्यते । निर्णीतदानादिः पूर्वेद्युर्यजमानः पत्नीसमेतः कृतस्नानः शुचिः धृतशुक्लवासाः क्लृप्तदेशे पुण्याहवाचनं कुर्यात् ॥

End:

ततोऽभिषेकवस्त्राणि आचार्याय दद्यात् । तत आज्य-निरीक्षणं कुर्यात् । ततो यथाशक्ति ब्राह्मणभोजनं कृत्वा आशिषो गृह्णीयात् ॥

Remarks:—The Ms. is in good condition.

TILAPARVATADĀNAPRAYOGAḤ.

Descriptive No.		Collection No.	Substance.	Script.	Remarks.
13745	B. L.	3336	P.	De.	Complete.
13746	,,	3334	,,	,,	,,
13747	,,	3315	,,	,,	,,
13748	,,	3333	,,	,,	,,

॥ तिलदानमन्त्रः ॥

13749. TILADĀNAMANTRAḤ.

Burnell's Catalogue No. 3294. **Paper.** $11\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheet—1. Lines—9 to a Page. Devanāgarī. No. of Granthas—12. Complete.

Beginning:

शनिप्रीत्यर्थदानानि ॥ तिलदानमन्त्रः ॥

महर्षेर्गोत्रसंभूताः काश्यपस्य तिलाः स्मृताः ।
तस्मात्तिलप्रदानेन मम पापं व्यपोहतु ॥ १ ॥

मेषदानमन्त्रः ॥

छागः प्रियो हि देवानामाहुतिस्ते व्यवस्थितः ।
अस्य चैव प्रदानेन शान्तिरस्तु सदा मम ॥ २ ॥

End:

कृष्णाजिनदानमन्त्रः ।

कृष्णाजिनं पवित्रं हि भूषणं ब्रह्मचारिणः ।
यज्ञादौ साधनं यस्मादतः शान्तिं प्रयच्छ मे ॥ १० ॥

Remarks:—The Ms. is in good condition.

॥ तिलधेनुदानविधिः ॥

13750. TILADHENUDĀNAVIDHIḤ.

Burnell's Catalogue No. 3365. Paper. 12×6⅛ inches. Sheets—2. Lines—10 to a Page Devanāgarī. No. of Granthas—87. Complete.

Beginning:

अथ लिङ्गपुराणोक्ततिलधेनुदानविधिः । सनत्कुमार उवाच ।

अतः परं प्रवक्ष्यामि तिलधेनुविधिं क्रमात् ।
पूर्वोक्तमण्डलं कुर्याच्छिवपूजां तु पश्चिमे ॥
तस्याग्रे मध्यतो भूमौ पद्ममालिख्य शोभनम् ।
वस्त्रैराच्छादितं पद्मं तन्मध्ये विन्यसेच्छुभम् ॥

End:

तदुक्तं कामिके ।

पूर्ववन्मण्डपं कुर्याद्वेदिकामण्डलान्वितम् ।

तद्गुरुपूजां च होमं च ... आद्यं तथैव च ॥
पश्चाङ्गं भूषणं पश्चानिष्के ... प्रकल्पयेत् ।
दक्षिणां पूर्ववद्दद्यादनुक्तं पूर्ववद्भवेदिति ॥

Colophon:

इति लिङ्गपुराणोक्ततिलधेनुदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ तिलधेनुदानप्रयोगः ॥

13751. TILADHENUDĀNAPRAYOGAḤ.

Burnell's Catalogue No. 8366. Paper. $12\frac{1}{4}\times6\frac{1}{2}$ inches Sheets—12, Lines—19 to 21 to a Page. Devanāgarī. No. of Granthas—750 **Complete.**

Beginning:

श्रीगणेशाय नमः ॥
अथ लिङ्गपुराणोक्ततिलधेनुदानविधिः ॥
तिलधेनुदानं चिकीर्षुः शुभे दिने शोभने मुहूर्ते तीर्थ-
पुण्य...मण्डपं कर्तुं यथायोगं मार्जनादिभिः स्मृत्युक्त-
मार्गेण भुवं संशोध्य समां आदर्शतलसंनिभां कुर्यात् ॥

End:

अनेन मया कृतेन लिङ्गपुराणोक्ततिलधेनुदानेन भग-
वान्सर्वात्मकः श्रीसाम्बसदाशिवः प्रीयताम् ॥ ततः स्वस्ति-
पुण्याहवाचनं कुर्यात् ॥

Colophon:

इति लिङ्गपुराणोक्तषोडशदानान्तर्गततिलधेनुदानप्रयोगः संपूर्णः ॥

Remarks:—The Ms. is in good condition.

TILADHENUDĀNAPRAYOGAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13752	B. L. 3379	P.	De.	Complete.

॥ तैलयन्त्रदानम् ॥

13753 TAILAYANTRADĀNAM.

Burnell's Catalogue No. 2264. Paper. $9 \times 3\frac{3}{4}$ inches. Sheets —2. Lines—8 to a Page. Devanāgarī. No. of Granthas—23. Complete.

Beginning:

श्रीगणेशः प्रसन्नः ।

अथातः संप्रवक्ष्यामि तैलयन्त्रविधानकम् ।
सर्वपापक्षयकरं सर्वसौभाग्यदायकम् ॥
सर्वसंपत्करं स्त्रीणां पुत्रपौत्रप्रवर्धनम् ।
तैलयन्त्रप्रदानेन यमलोकं न पश्यति ॥

End;

द्विजवर्य नमस्तेऽस्तु त्राहि मां भवसागरात् ।
तैलयन्त्रप्रदानेन सर्वान्कामान्प्रपूरय ॥
इति मन्त्रेण ब्राह्मणाय दद्यात् ॥

Colophon:

इति दानपद्धतिः ।

Remarks:—The Ms. is in good condition.

TAILAYANTRADĀNAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
13754	J. L. 1186	P.	De.	Complete.

॥ काकवन्ध्यात्वहरदानम् ॥

13755. KĀKAVANDHYĀTVAHARADĀNAM.

Not noticed by Burnell. Ms. No. 15584. Paper. $3\frac{7}{8} \times 10\frac{1}{4}$ inches. Sheet—1. Lines—28 to a Page. Devanāgarī. No. of Granthas—12. Complete.

Beginning:

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते ।
जन्तूनां च हितार्थाय सर्वं ब्रूहि दिवाकर ॥

श्रीसूर्य उवाच ॥

एकवस्त्रविधानं च कर्तव्यं संगमोत्तमे ।
अष्टोत्तरशतं विप्रान्नानान्नेन तु तर्पयेत् ॥

स्वर्णधेनुः प्रदातव्या पलैकेन विनिर्मिता ।
कूष्माण्डीफलदानं च कर्तव्यं रविवासरे ॥

End:

अङ्गुलीषु तले पाण्योः प्रकोष्ठांसकसन्धिषु ।
अग्निशस्त्रमरुत्कोपान्नानाव्रणभयार्तयः ॥

प्रतिवेश्मादिकं सर्वं प्रश्नभादेव कीर्तयेत् ।

Colophon:

इति श्रीज्ञानभास्करे अपत्याधिकारे कर्णेतरवर्गे काकवन्ध्यात्वहरप्राय-श्चित्ताध्यायः ॥

Remarks:—The Ms. is in good condition.

॥ अर्शोरोगहरप्रतिमादानम् ॥

13756. ARŚOROGAHARAPRATIMĀDĀNAM.

Burnell's Catalogue No. 8293. Paper. $14\frac{1}{2} \times 5$ inches. Sheets

—3. Lines—9 or 10 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

श्रीगणेशाय नमः ॥

महार्णवोक्ताशोरोगहरप्रतिमादानपद्धतिः ॥

ततो यजमानः । कृतनित्यक्रियः । वस्त्राच्छादितपीठे प्राङ्मुख उपविश्य ० अमुकनामधेयस्य मम अर्शोरोगजनितसमस्तपीडापरिहारद्वारा क्षिप्रारोग्यसिद्ध्यर्थं अर्शोरोगप्रतिमादानं करिष्ये ॥

End:

पूजामन्त्रः । आतङ्कनाम्न्यै देवतायै नमः । सूर्यमन्त्रः ह्रामिति षडक्षरः । सौराष्ट्राक्षरे मन्त्रः । ततः सोमादीनां दिव्याभरणसंपन्नं रक्तस्रग्गन्धवाससं अश्विन्यादीनां नाम मन्त्रा एव ॥

Remarks:—The Ms. is in a fairly good condition.

॥ अर्शोरोगहरप्रतिमादानविधिः ॥

13757. ARŚOROGAHARAPRATIMĀDĀNA-VIDHIḤ.

Burnell's Catalogue No. 8278. Paper. $11\frac{3}{4} \times 5$ inches. Sheets—6. Lines—8 or 9 to a Page. Devanāgarī. No. of Granthas—5. Complete.

Beginning:

श्रीगणेशाय नमः ।

अथ महार्णवोक्ताशोरोगहरप्रतिमादानविधिः ॥

ततो यजमानः कृतनित्यक्रियः वस्त्राच्छादिते पीठे प्रा-

ङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य Same as No. 3293.

End:

ये ये रोगाः प्रबाधन्ते राजयक्ष्मज्वरादयः ।
तेषां तेषां प्रतिच्छन्दोदनैरिष्टया प्रयत्नतः ॥
दिननाथांश्च संतर्प्य बद्धानां तु विमोक्षणम् ।

Colophon:

इति महार्णवोक्तातङ्कप्रतिमादानविधिः समाप्तः ॥

Remarks:—The Ms. is in good condition.

॥ राजयक्ष्महरप्रतिकृतिदानम् ॥

13758. RĀJAYAKṢMAHARAPRATIKṚTIDĀNAM.

Burnell's Catalogue No. 3262. Paper. $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—42. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ राजयक्ष्महरव्याधिप्रतिकृतिदानम् ।

ब्रह्माण्डपुराणे ।

धर्मशास्त्राण्यविज्ञाय प्रायश्चित्तं ददाति यः ।
राजयक्ष्मा भवेत्तस्य रोगपीडातिदारुणा ॥

End:

तत्रायं क्रमः ॥

राजयक्ष्मपूजाङ्गकलशाराधनं करिष्ये । कलशस्य मुखे विष्णुरित्यादिमन्त्रैः कलशमभिमन्त्र्य गन्धपुष्पाक्षतैरभ्यर्च्य तदुदकेन पूजाद्रव्याण्यात्मानं चाभिप्रोक्ष्य प्रतिमायामग्न्युत्तारणं कुर्यात् ॥

Colophon:

राजयक्ष्महरव्याधिप्रतिकृतिदानं संपूर्णम् ॥

Remarks:—The Ms. is in good condition.

॥ प्रदरादिरोगहरदानम् ॥

13759. PRADARĀDIROGAHARADĀNAM.

T. S. Collection No. 966. Paper. 9×4½ inches. Sheets —4. Lines—8 to a Page. Devanāgarī. No. of Granthas—8 to 10. Complete.

Beginning:

अथ प्रदररोगहरं कर्मविपाकसंग्रहे ।

मासोपवासिनी नारी रेतः प्रस्रावयेद्यदि ।

सा तत्पातकदोषेण जायते चान्धजन्मनि ॥

End:

फलस्वरूपं परिभाषायां परिमाणप्रकरणेऽभ्यधायि ।

रजतदानमन्त्रोऽपि प्रायश्चित्तोपक्रमपद्धतौ ॥

Colophon;

इत्यजीर्णशूलहरम् ॥

Subject:

प्रदररोगः, स्रवद्योनिशोणित, भगव्रणहर, असाध्यसर्वरोग, अजी-
र्णशूलहर, कुब्जत्वहर, अपुष्पवतीत्वहर ॥

Remarks:—The Ms. is in good condition.

॥ भगव्रणहरदानम् ॥

13760. BHAGAVRAṆAHARADĀNAM.

T. S. Collection No. 965. Paper. 9×4⅜ inches. Sheet—1. Lines—10 or 11 to a Page. Devanāgarī. No. of Granthas—20. Complete.

Beginning:

अथ भगव्रणहरम् । कर्मविपाकसंग्रहे ।

मृते भर्तरि या नारी ब्रह्मचर्यविघातिनी ।

सा भवेद्व्रणदोषेण संभोक्तुं क्षमते न च ॥

संभोगानन्तरं तीव्रवेदना पुरुषस्य च ।

दद्यान्नीलवृषं गां वै मधुसर्पिस्तिलानि च ॥

End:

समिधां लक्षणं वक्ष्ये संख्यामासां तथैव च ।

* विशीर्णा विरला ह्रस्वा यक्राः स ससुषिराः कृशाः ।

* *

अश्वत्थः सर्वसामाय सौभाग्योदुम्बरस्तथा ।

शमी शमयते पापं दूर्वा पुष्पविवर्धिनी ।

कुशा धर्मार्थकामानां ।

Remarks:—The Ms. is in good condition.

॥ आयुष्करदानविधिः ॥

13761. AYUṢKARADĀNAVIDHIḤ.

Not noticed by Burnell. Ms. No 15885. Paper. 8¾×11 inches. Sheet—1. Lines—23-25 to a Page Devanāgarī. No. of Granthas—22. Complete.

Beginning:

श्रीगणेशाय नमः ॥

यामलोक्तायुष्करदानविधिः । आचम्य देशकालौ संकीर्त्य । कौशिकगोत्रोत्पन्नस्य रोहिणीनक्षत्रे वृषभराशौ जातस्य श्रीमतः श्रीशिवाजिराजनामधेयस्य मम कुमारस्य + वेदोक्तशतवर्षजीवित्वसिद्ध्यर्थं यामलोक्तं आयुष्कर-दानं करिष्ये ॥

End:

ब्रह्मादिदेवताः गन्धादिभिः पूजयेत् । ततः पञ्चब्राह्म

णान् गन्धवस्त्रपुष्पैरभ्यर्च्य सकलशवस्त्राः पञ्च ॥

Remarks:—The Ms. is in good condition.

॥ मृत्युमहिषदानम् ॥

13762. MṚTYUMAHIṢADĀNAM.

Not noticed by Burnell. Ms. No 3265 a. Paper. 10¼ × 4¼ inches. Sheets—2 (3 & 4 out of 4). Lines—9 to a Page. Devanāgarī. No. of Granthas—20. Complete.

Beginning:

अथ मृत्युमहिषदानम् ॥

अमावास्याष्टमीचतुर्दशीव्यतीपातवैधृतिकष्टदिनेषु स्व-

गृहे शुद्धदेशे गोमयानुलेपितरङ्गवल्ल्यादि रचयित्वा तत्र

सर्वावयवसंयुक्तं महिषं दक्षिणाभिमुखं निधाय + प्राङ्-

मुखः सन्दानसंकल्पं कुर्यात् ॥

End:

श्रीधर्मराजप्रीत्यर्थं यामलोक्तप्रकारेण मृत्युमहिषदानं

करिष्ये । ततो यमप्रतिमापूजा महिषपूजा ।

Remarks:—The Ms. is in good condition.

॥ मृत्युमहिषीदानम् ॥

13763. MṚTYUMAHIṢĪDĀNAM.

T. S. Collection No. 808. Paper. 9½ × 1¾ inches. Sheets—4. Lines—8 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

अथ मृत्युमहिषीदानम् ॥

गोमयेनानुलिप्तरङ्गवल्ल्याद्यलंकृतभूमौ सवत्सां सालं-
कृतां महर्षीं दक्षिणाभिमुखीं संस्थापयेत् ॥

End:

फलं मनोरथफलं प्रददाति सदा नृणाम् ।
पुत्रपौत्राभिवृद्ध्यर्थमतः शान्तिं प्रयच्छ मे ॥
एवं दत्त्वा भूरिदानं कुर्यात् । यजमानो वत्सरान्तं
तन्मुखं नावलोकयेत् ॥

Colophon: इति मृत्युमहिषीदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ महिषीदानपद्धतिः ॥

13764. MAHIṢĪDĀNAPADDHATIḤ.

Burnell's Catalogue No. 8251. Paper. $9\frac{7}{8} \times 4\frac{1}{4}$ inches. Sheets—15. Lines—6 or 7 to a Page. Devanāgarī. No. of Granthas—140. Complete.

Beginning:

श्रीगणेशाय नमः ॥

महिषीदानं लिख्यते । विश्वामित्र उवाच ।
ब्रह्मन्विधेहि पुत्रार्थमपमृत्युहरं परम् ।
यत्कृत्वा सर्वपापेभ्यो ह्यकालमरणात्तथा ॥
मुच्यते नात्र संदेहो धर्मराजप्रसादतः ।
शृणुष्वावहितो भूत्वा संभारांस्तान्वदामि ते ॥

End:

दुग्धाधिकां हि महिषीं नवमेघवर्णां
संतुष्टतर्णकवतीं जघनातिभाराम् ।

दत्त्वा सुवर्णतिलकां द्विजपुंगवाय

लोकद्वयीं हि जयतीह किमत्र चित्रम् ॥

Colophon: इति सुखमहिषीदानविधिः

Colophon: (Sheets 5).

इति ब्रह्माण्डपुराणे विश्वामित्रद्विजसंवादे अपमृत्युहरमहिषीदानविधिः।

नीरध्यम्बरमेदिनीपतिमिते शाके १६०४च संवत्सरे

दुन्दुभ्याख्य इने तु दक्षिणगते मासे नभस्ये सिते ।

द्वादश्यां दिननायकस्य दिवसे धर्माधिकारी सुधीः

श्रीनारायणजो लिलेख महिषीदानं त्वनन्ताह्वयः ॥

Remarks:—The Ms. is in good condition. 1—5 Sheets deal with one way and 5-15 Sheets deal with the way given in Brahmāṇḍapurāṇa. On the back of the last sheet is given:—

" पुस्तकमिदं केशवरावपुरोहितानाम् "

On the tittle page is given:— " शामाजीनायकपण्डे ॥

The Ms. is dated A. D. 1682 and is written by Ananta son of Narāyaṇa.

॥ मन्दाग्निहरमेषदानम् ॥

13765. MANDĀGNIHARAMEṢADĀNAM.

Burnell's Catalogue No. 3289. Paper. 10¼ × 4¼ inches, Sheets —4. Lines—5 to a Page. Devanāgarī. No. of Granthas—28. Complete.

Beginning:

अथ बोधायनोक्तमन्दाग्निहरमेषदानम् ॥

अग्नेर्मान्द्यं भवेद्यस्य यस्त्रेताग्निविनाशकः ।

वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा पुरा ॥

End:

तत्र शं नो वात इत्यादितैत्तिरीयघोषशान्तिः, तथा

आश्वलायनघोषशान्तिरपि । परिभाषायां रोगप्रतिमादा-
नविधौ निरूपितम् ॥

Colophon: इत्यग्निमान्द्यहरमेषदानम् ॥

Remarks:—The Ms. is in good condition.

॥ विद्वेषणदानम् ॥

13766. VIDVEṢAṆADĀNAM.

Burnell's Catalogue No. 8305. Paper. 10½ × 5 inches. Sheets—2. Lines—11 to a Page. Devanāgarī. No. of Granthas—36. Complete.

Beginning:

इन्द्रः ।
विद्वेषणस्य माहात्म्यं विधिं विधिमतां वर ।
सर्वमेतद्यथार्थं मे वदस्व करुणाकर ॥
श्रीकृष्णः ॥
अमरेश महाभाग शृणु सर्वं विधानतः ।
आयसीं प्रतिमां कृत्वा शत्रोरष्टमराशिके ॥

End:

आचार्यं तोषयेत्पश्चाद्वस्त्रालंकारधेनुभिः ।
शीघ्रं शत्रुविनाशाय कुर्यादेवं महीपतिः ॥

Colophon: इति यामले विद्वेषणदानविधिः ॥

Remarks:—The Ms. is in good condition.

॥ अपमृत्युहरदीपदानम् ॥

13767. APAMṚTYUHARADĪPADĀNAM.

Burnell's Catalogue No. 3296. Paper. 10¼ × 4 inches.

Sheet—1. Lines—9 to a Page. Devanāgarī. No. of Granthas—10. Incomplete.

Beginning:

शुभमस्तु । अपमृत्युपरिहारार्थं दीपदानम् । पूर्वोक्त० शुभतिथौ आदित्यशन्यन्तर्गतश्रीलक्ष्मीनरसिंहप्रेरणया श्रीलक्ष्मीनरसिंहप्रसादेन मम समस्तपीडापरिहारार्थं समस्तरोगपरिहारार्थं अपमृत्युपरिहारार्थं दीपदानमहं करिष्य इति संकल्प्य ॥

End:

मम आदित्यशन्यन्तर्गतश्रीलक्ष्मीनरसिंहप्रसादेन * अपमृत्युपरिहारार्थं च इमं दीपं सदक्षिणाकं सताम्बूलं अमुकनामधेयाय तुभ्यमहं संप्रददे न मम । देवस्य त्वा० प्रतिगृह्यतामिति यजमानः । प्रतिगृह्णाति विप्रः । शान्ता पृथिवी । यस्य स्मृत्या आदित्यशन्यन्तर्गतः प्रीयताम् । शुभमस्तु ॥

Remarks:—The Ms. is in good condition.

॥ आलिङ्गनदानपद्धतिः ॥

13768. ĀLIṄGANADĀNAPADDHATIḤ.

Burnell's Catalogue No. 3261. Paper. 10×4½ inches. Sheets—4. Lines—8 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

अथालिङ्गनदानरचना ॥

असाध्यमहारोगसंभवसमये एतद्दानं चिकीर्षुः स्वगृहे स्वस्य शय्यानिकटे भुवं गोमयेनानुलिप्य रङ्गवल्ल्यालंकृत्य + शुक्लाम्बरधरो देशकालौ संकीर्त्य दानसंकल्पं

कृत्वा + रुद्रयामलोक्तप्रकारेण त्रिग्रालिङ्गनपुरःसरं रो-
गयुक्तस्यात्मनः प्रतिमादानं रोगप्रतिपादानं च करिष्ये ॥

End:

तन्मार्गं गोमयाम्भसा मार्जयित्वा ।
यस्य स्मृत्येत्यादिना सर्वं भगवदर्पणं कुर्यात् ।

Colophon:

इति रुद्रयामलोक्तालिङ्गनपद्धतिः ॥

Remarks:—The Ms. is in a fairly good condition.

॥ करकदानम् ॥

13769. KARAKADĀNAM.

Burnell's Catalogue No. 8350 (u). Paper. 10×4 inches. Sheet—1. Lines—8 to a Page. Telugu. No. of Granthas—7. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आचम्य । प्राणानायम्य । देशकालौ संमन्त्य । मम
इह जन्मनि जन्मान्तरे सकलसौभाग्यतासिद्ध्यर्थं सत्स-
न्तानादिवृद्ध्यर्थं * * करिष्ये ॥

End:

तुभ्यमहं संप्रददे ॥ प्रतिगृह्यताम् । प्रतिगृह्णामि ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ कूष्माण्डदानम् ॥

13770. KŪṢMĀṆḌADĀNAM.

G. K. D. Collection No. 138. Paper. $7\frac{3}{4}\times 6$ inches. Sheets—2 Lines—17 to a Page. Devanāgarī. No. of

Granthas—20. Complete.

Beginning:

आचम्य । शुभे शोभने तिथौ ममोपात्तदुरितक्षयद्वारा + समस्तमङ्गलावाप्त्यर्थं मकरसंक्रान्तिप्रयुक्तदानानि करिष्ये ॥

End:

नवनीतलिङ्गदानस्य मन्त्रः ।

नवनीतमयं लिङ्गं गुडपार्वतिसंयुतम् ।

तस्मादस्य प्रदानेन ० इदं नवनीतमयलिङ्गदानं सदक्षिणाकम् ॥

Remarks:—The Ms. is in good condition. The works contained herein are:—

कूष्माण्डदानम् । तिलदानम् । नवनीतलिङ्गदानम् ।

॥ छायादानविधिः ॥

13771. CHĀYĀDĀNAVIDHIḤ.

Burnell's Catalogue No. 3944, Paper. 6⅛ × 4 inches. Sheets —2. Lines—8 to a Page. Devanāgarī. No. of Granthas—16. Complete.

Beginning:

अथ च्छायादानविधिः ॥

दधिमधुघृतलाजपुष्पाक्षतोदुम्बराश्वत्थमुक्तामणिच्छत्रदूर्वाङ्कुशादर्शकन्याश्वत्थस्यन्दनाष्टापदाक्षाच्चरुभद्रपीठानि सस्यानि मत्स्यादयाहं प्रचाषौवृषः । केसरीदक्षिणावर्तशङ्खाम्बुसिद्धार्थकारोचनास्वस्तिकं तोरणं कीचकावेणवः ॥

End:

नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां तेभ्यस्तेभ्यः संप्रददे न मम ॥ ताम्बूलानिपान्तु ऐश्वर्यमस्तु ।

यावद्दीर्घो० दीर्घमायुः ॥

Colophon: इति च्छायादानविधिः ।

Remarks:—The Ms. is in good condition.

॥ दशदानमन्त्रः ॥

13772. DAŚADĀNAMANTRAḤ.

G. K. D. Collection No. 127. Paper. 9×4½ inches. Sheets—5. Lines—8 to a Page. Devanāgarī. No. of Granthas—50. Complete.

Beginning:

दशदानमन्त्रः ॥ गोदानम् ।

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।

.........मे स्यादिह लोके परत्र च ॥

End:

दधि । दधि त्वां दधि पुष्येय सदा सन्तुष्टिरुत्तमा ।

अतस्तव प्रदानेन तुष्टिरस्तु सदा मम ॥

Remarks:—The Ms is in good condition.

॥ आश्वलायनमधुपर्कदानप्रयोगः ॥

13773. ĀŚVALĀYANAMADHUPARKADĀNA-PRAYOGAḤ.

Burnell's Catalogue No. 2620, Paper. 10½×4½ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—27. Complete.

Beginning:

देशकालौ स्मृत्वा । वृतेभ्य आचार्यब्रह्मऋत्विक्सद-स्येभ्यो मधुपर्कदानानि करिष्ये ॥ ततो यजमानः ।

विष्टरो विष्टरो विष्टरः प्रतिगृह्यन्ताम् ॥

End:

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मामामनागामदितिं वधिष्ट । ॐ उत्सृजतेत्युक्त्वा विसृजेत् । ततो दाता गन्धमाल्यवस्त्रयुगाभरणाद्याचार्याय दद्यात् ॥

Remarks:—The Ms. is in good condition.

MADHUPARKADĀNAPRAYOGAḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
13774	B. L.	2612	P.	De.	Complete.
13775	,,	2621	,,	,,	,,
13776	,,	2625	,,	,,	,,
13777	,,	2626	,,	,,	,,

॥ लोहदानम् ॥

13778. LOHADĀNAM.

Not noticed by Burnell Ms. No. 15836 Paper. $3\frac{1}{4} \times 8\frac{1}{2}$ inches. Sheet—1. Lines—12 to a Page. Devanāgarī. No. of Granthas—3. Complete.

Beginning:

यस्मादायसकर्माणि त्वदधीनानि सर्वदा ।

लाङ्गूलाद्या यथार्थानि अतः शान्तिं प्रयच्छ मे ॥

End:

तैलदानम् । रूपरसः ।

तैलं पुष्टिकरं नित्यं तैलमायुष्यवर्धनम् ।

अमाङ्गल्यहरं नित्यमतः शान्तिं प्रयच्छ मे ॥

Remarks:—The Ms. is in good condition.

॥ वाग्दानम् ॥

13779. VĀGDĀNAM.

Burnell's Catalogue No. 2623. Paper. $9\frac{1}{4}\times4$ inches. Sheets—2. Lines—8 to a Page. Devanāgarī. No. of Granthas—25. Complete.

Beginning:

आचम्य प्राणान्नियम्य । देशकालौ संकीर्त्य । शोभन-
देवतान्तर्यामिश्रीलक्ष्मीनारायणप्रीत्यर्थं मम कन्यायाः
करिष्यमाणविवाहाङ्गभूतवाग्दानं करिष्ये ॥

End:

इमं नो यज्ञं विहविजुषस्वास्य कुर्मो हरिवो मेदिनत्वा ।

Remarks:—The Ms. is in good condition.

॥ हरिद्रादानम् ॥

13780. HARIDRĀDĀNAM.

Burnell's Catalogue No. 3295. Paper. $11\frac{1}{4}\times4\frac{1}{2}$ inches. Sheet—1. Lines—6 to a Page. Devanāgarī. No. of Granthas—6. Complete.

Beginning:

गुरुप्रीत्यर्थदानानि । हरिद्रादानमन्त्रः ॥
गौरीप्रिया हरिद्रा च नित्यकल्याणदायिनी ।
दानेनास्याः सुखं शान्तिः संपदस्तु सदा मम ॥
चणकदानमन्त्रः ।
गोवर्धनगिरेर्धारसमये हरिरक्षिताः ।
चणकाः सर्वपापघ्ना मम शान्तिं ददत्वमी ॥

End:

कपिलादानमन्त्रः ।

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

Remarks:—The Ms. is in good condition.

॥ श्रवणाकर्मसर्पबलिप्रयोगः ॥

13781. ŚRAVAṆĀKARMASARPABALIPRAYOGAḤ.

Burnell's Catalogue No. 2703. Paper. $11\frac{1}{8}\times5\frac{1}{4}$ inches. Sheets—12. Lines—8-11 to a Page. Devanāgarī. No. of Granthas—250. Complete.

Beginning:

श्रीगणेशाय नमः ॥

